कृत्वा लोहमये पात्रे मार्द्दे वा विमरन्ध्रके ।
रसैः पञ्चोपमं कृत्वा तं पचेद्गोमयाग्निना ॥
पुटानि क्रमशो दद्यात् पृथगेषां विधानतः ।
त्रिफलार्द्रकभृङ्गाणां केशराजस्य बुद्धिमान् ॥
मानकन्दकभल्लातवह्नीनां सूरणस्य च ।
हस्तिकर्णपलाशस्य कुलिशस्य तथैव च” ॥
भृङ्ग भङ्गरिया । केशराजः भृङ्गराज इति हिः ।
कुलिशं स्नुहीक्षीरं ।
“पुटे पुटे चूर्णयित्वा लोहात् षोड़शिकं पलं ।
तन्मानं त्रिफलायाश्च पलेनाधिकमाहरेत् ॥
अष्टभागावशिष्टे तु रसे तस्याः पचेद्बुधः ।
अष्टौ पलानि दत्त्वा च सर्पिषो लोहभाजने ॥
ताम्रे वा लोहदर्व्या तु चालयेद्विधिपूर्ब्बकं ।
ततः पाकविधानज्ञः स्वच्छे चोर्द्ध्वे च सर्पिषि ॥
मृदुमध्यादिभेदेन गृह्णीयात् पाकमाज्यतः ।
आरभेत विधानज्ञः कृतकौतुकमङ्गलः ॥
भ्रामरं घृतसंयुक्तं विलिह्यादक्तिकक्रमात् ।
वर्द्धमानानुपानश्च गव्यक्षीरेण संयतं ॥
गव्याभावे त्वजायाश्च स्निग्धद्रव्यादिभोजनं ।
सद्योवह्निकरश्चैव भस्मकञ्च नियच्छति ॥
हन्ति वातं तथा पित्तं कुष्ठानि विविधं ज्वरं ।
गुल्माग्निपाण्डुरोगांश्च निद्रालस्यमरोचकं ॥
शूलञ्च परिणामञ्च प्रमेहमववाङ्कं ।
श्वयथुं रुधिरस्रावं दुर्नामानं विशेषतः ॥
बलकृद्वृंहणश्चैव कान्तिदं स्वरवर्द्धनं ।
शरीरलाघवकरमारोग्यं पुष्टिवर्द्धनं ॥
आयुष्यं श्रीकरश्चैव वयस्तेजस्करं शुभं ।
सश्रीकपुत्रजननं वलीपलितनाशनं ॥
दुर्नामारिरियं नाम्ना दृष्टो वारसहस्रशः ।
अनेनार्शांसि दह्यन्ते यथा तूलञ्च वह्निना ॥
सौकुमार्य्याल्पकायत्वात् मद्यसेवी यथा नरः ।
जीर्णमद्यादियुक्तादिभोजनैः सह दापयेत्” ॥
रसेन्द्रचिन्तामणौ यथास्थाने यदा तृतीयचरण-
स्थाने जीर्णे मद्ये प्रयोक्तव्यमिति पाठः ।
“लावतित्तिरवर्त्तीरमयूरशशकादयः ।
चटकः कलविङ्कश्च वर्त्तका हरितालकः ॥
श्येनकश्च हहस्तावो वनविष्करकादयः ।
पारावतमृगादीनां मांसं जाङ्गलकं शुभं ॥
वर्त्तीरः वगेरा इति लोके । चटको वन्यचटकः ।
कलविङ्को गृहचटकः । वर्त्तका वटई इति लोके ।
हरितालकः हरिताल इति लोके । विष्किरा-
वर्त्तकादयः ।
“मद्गुरो रोहितः श्रेष्ठः शकुलश्च विशेषतः ।
मत्स्यराजा इमे प्रोक्ता हितमत्स्याय देहिने ॥
वृन्ताकस्य फलं शस्तं पटोलं वृहतीफलं ।
प्रलम्बाभीरुवेत्राग्रं तालकस्तण्डुलीयक” ॥
प्रलम्बा लम्बालावुः । अभीरुः शतावर्य्याः पत्रशाकं ।
तालकः देवदाली । तथा च निघण्टौ धन्वन्तरिः ।
“जीमूतको देवताड़ो वृत्तकोशो गरा गरी ।
प्रोक्ताखुविषहृद्देवी देवदाली च ताड़कः ॥
देवदाली रसे तिक्ता कफार्शःशोथपाण्डुताः”
नाशयेदित्यादि ॥

“वास्तूकं धान्यशाकञ्च केमुकं चक्रवर्त्तनं” ;
चक्रवर्त्तनं चकवतशाकं ।
“नारिकेलञ्च खर्ज्जूरं दाड़िमं लवलीफलं ।
शृङ्गाटकञ्च पक्वाम्रं द्राक्षा तालफलानि च ।
जातीकोषं लवङ्गञ्च पूगं ताम्बूलपत्रकं ॥
हितान्येतानि वस्तूनि लोहमेतत् समश्नतां ।
गाम्भीयम्लकुचं कोलं कर्कन्धुवदराणि च ।
जम्बीरं वीजपूरञ्च तिन्तिड़ीं करमर्द्दकं” ॥
कोलं क्षुद्रवदरं । कर्कन्धुवदराणि महान्ति ।
“आनूपानि च मांसानि शकरं पुण्डकानपि ।
हंससारसदात्यूहशकुकङ्कवलाकिकाः ॥
माणकन्दकरीराणि कतकञ्च कलिङ्गकं ।
कुष्माण्डकञ्च कर्कोटिं केमुकञ्च विशेषतः ॥
कटुकं कालशाकञ्च कशेरुं कर्कटीं तथा ।
ककारादीनि सर्व्वाणि द्विदलानि च वर्जयेत् ॥
शङ्करेण समाख्यातश्चूर्णराजोऽनुकम्पया ।
जगतामुपकाराय दुर्नामारिरियं ध्रुवं ॥
स्थानादपैति मेरुश्च पृथ्वी पर्य्येति वायुना ।
पतन्ति चन्द्रताराश्च मिथ्या चेदहमब्रुवं ॥
ब्रह्मघ्नाश्च कृतघ्नाश्च क्रूरा येऽसत्यवादिनः ।
वर्ज्जनीयाः स्वधर्म्मेण भिषजा गुरुनिन्दकाः ॥
मुनिरसपिष्टविड़ङ्गं मुनिरसलोढ़ं चिरस्थितं घर्मे ।
द्रावयति लोहदोषान् वह्निर्नवनीतपिण्डमिव” ॥
मुनिरत्रागस्तिः ।
“काले मलप्रवृत्तिर्लाघवमुदरे विशुद्धिरुद्गारे ।
अङ्गेषु नावसादो मनःप्रसादोऽस्य परिपाके ॥
कृमिरिपुचूर्णं लीढ़ं सहितं स्वरसेन वङ्गसेनस्य ।
क्षपयत्यचिरान्नियतं लोहाजीर्णोद्भवं शूलं” ॥
वङ्गसेनस्य अगस्तेः ।
“जीर्णे लोहे पतति चूर्णं भुञ्जीत सिद्धसाराख्यं ।
लोहव्यापन्नश्यति विवर्द्धते जाठरो वह्निः” ॥
तद्यथा,—
“पथ्यासैन्धवशुण्ठीमागधिकानां पृथक् समो भागः ।
त्रिवृतो भागौ निम्बू भाव्यं तत् सिद्धसाराख्यं” ॥
“भवेद्यद्यतिसारस्तु दुग्धं पीत्वा रुजं जयेत् ।
गुञ्जाद्वादशकादूर्द्ध्वं वृद्धिरस्य भयप्रदा” ॥
शङ्करप्रणीतं लोहं । इति सामान्यक्रिया ॥१७॥*॥
अथ रक्तार्शसां चिकित्सा ।
“रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टास्रे निगृहीते स्युः शूलानाहास्रगामयाः ॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः क्व-
थिताः । रक्तार्शसां प्रशमना दार्व्वीत्वगुशीरनिम्बा
वा” ॥ चन्दनमत्र रक्तचन्दनं । चन्दनादिक्वाथः ॥१॥
नवनीततिलाभ्यासात् २ । केसरनवनीतशर्करा-
भ्यासात् ३ । दधिसरमथिताभ्यासात् ४ । गुदजाः
शाम्यन्ति रक्तावहाः ॥
“दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः” ।
मथितं सररहितं निर्ज्जलं वस्त्रपूतं दधि ।
सपत्रकेसरं क्षौद्रं नवनीतं त्वचं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शसः सुखीभवेत् ॥ ५ ॥
पयसा शृतेन यूषैः सतीनमुद्गाढ़कीमसूराणां ।
ओदनमद्यादस्रैर्मधुरै रीषवृसुगन्धैश्च ॥ ६ ॥

समङ्गोत्पलमोचाङ्कतिरीटतिलचन्दनैः ।
सिद्धं छागीपयो दद्याद् गुदजे शोणितात्मके” ॥
समङ्गा लज्जालुः । मोचाङ्को मोचरसः । तिरीटो
लोध्रः । चन्दनमत्र रक्तं । समङ्गादिदुग्धं ॥ ७ ॥
“भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनः पुनः ।
बन्धनात् सुदृढ़ं सूत्रं छिनत्त्यर्शोभगन्दरं” ॥
क्षारसूत्रं ॥ ८ ॥
“नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदितां ॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण चाग्निना ।
वेगावरोधस्त्रीपृष्ठयानान्युत्कटकाशनं ॥
यथास्वं दोषलञ्चान्नमर्शसः परिवर्ज्जयेत्” ।
इत्यर्शोऽधिकारः ॥ * ॥ इति भावप्रकाशः ॥
अर्शसः, त्रि, (अर्शस् + अस्त्यर्थे अच् ।) अर्शोरोग-
युक्तः । इत्यमरः ॥
(“हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्” ।
इति मनुः ।
“अन्नपानौषधं सर्व्वं तत्सेव्यं नित्यमर्शसाम् ।
हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः” ॥
इति भावप्रकाशः ।)
अर्शसानः, पुं, (ऋ + असानच्, सुट् ।) अग्निः ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (“अर्श-
सानाय शत्रूणां हिंसित्रे” । इति वेदभाष्यम् ।)
अर्शी, [न्] त्रि, (अर्शमस्त्यस्य, अर्श + इनि ।)
अर्शोरोगयुतः । इति शब्दरत्नावली ॥
अर्शोघ्नः, पुं, (अर्शो हन्ति, अर्श + हन् + ट ।)
ओलः । तत्पर्य्यायः । शूरणः २ कन्दः ३ । इत्य-
मरः ॥ सूरणः ४ । इति तट्टीका । ओल इति
भाषा । (अर्शोरोगविनाशकः ।
“अर्शोघ्नं कारभं मूत्रं मानुषन्तु विषापहम्” ।
इति सुश्रुते ।)
अर्शोघ्नी, स्त्री, (अर्शस् + हन् + ट + ङीप् ।) ताल-
मूली । इति मेदिनी ॥
अर्शोहितः, पुं, (अर्शसि हितः, सेवनेन तन्नाशक-
त्वात् ।) भल्लातकः । इति त्रिकाण्डशेषः । भेला
इति भाषा ।
अर्ह योग्यत्वे । (भ्वादिं-परं-सकं-सेट् ।) पूजने ।
इति कविकल्पद्रुमः ॥ अर्हति विप्रो वेदं पठितुं ।
सकर्म्मकोऽपि ।
“यज्ञदानतपांस्यस्य कलां नार्हन्ति षोड़शीं” ।
इति दुर्गादासः ॥
(“अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति” ।
इति मनुः ।
“हिंस्राण्यहान्यर्हसि सोढुमर्हन्” ।
इति रघुवंशे ।
“गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति” ।
इति मनुः ।)
अर्ह क पूजने । (चुरां-उभं-सकं-सेट् ।) इति
कविकल्पद्रुमः ॥ क अर्हयति । इति दुर्गादासः ॥
(“राजार्ज्जिहत्तं मधुपर्कपाणिः” । इति भट्टि-
काव्ये ।)